E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.013

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# न्यायवैशेषिकनये परमाणुवादविमर्शः

**बिप्लबसरकारः**
न्यायविभागः (शोधच्छात्रः)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य
(केन्द्रीयविश्वविद्यालयस्य)
Email -biplabs293@gmail.com

## सारसंक्षेपः

*न्यायवैशेषिकनये परमाणूनामतीन्द्रियत्वं जगदुत्पत्युपादानत्वं निरवयवत्वं नित्यत्वञ्च। परमाणुविषये दीधितिकारस्य वैमत्यदर्शनेऽपि समेषां न्यायवैशेषिकानां नये परमाणुषु एव विश्रामः। सूत्रकारेण परमाणुविषये संकेतितं यत्— **'परं वा त्रुटेः'**।अर्थात् परं यः स परमाणुः, तस्य चातिसूक्ष्मत्वात् विभागो न सम्भवति।न्यायवैशेषिकयोः नये परमाणोः नित्यत्वम्। पृथिवीजलतेजोवायुनां ये सावयवभूताः ते अनित्याः भवन्ति। तदतिरिक्ताः निरवयवभूताः तेषां परमाणवः नित्या भवन्ति। उक्तं जगदीशेन— **"तत्र सावयवा अनित्या इतराणि नित्यानि"**। परमाणूनां नित्यत्वात् परमाणोः परिमाणमपि नित्यं भवति। उक्तं च वैशेषिकसूत्रकारेण— **"नित्यं पारिमण्डल्यम्"**। परमाणुपरिमाणस्य नित्यत्वे सूत्रमेव प्रमाणम्। परिमण्डलमस्यास्तीति परिमाण्डलल्यं परमाणुपरिभाषाः। तेन आश्रयनाशाभावात् परमाणुपरिमाणं नित्यमविनाशि। प्रत्यक्षसिद्धान्महतः परिमाणाद् विपरीतं तदणुपरिमाणम्।*

**प्रमुखाः शब्दाः** –परमाणवः, जगतः , सप्तपदार्थः,असत्कार्यवादः ।

# न्यायवैशेषिकनये परमाणुवादविमर्शः

धर्मार्थकाममोक्षाख्यपुरूषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् सर्ववादिसम्मतत्वाद् एकविंशत्यात्मकदुःखनिवृत्तिरूपत्वात् तादृशदुःखानां चासह्यत्वात् न्यायदर्शनानुसारेण मोक्षप्रयोजकीभूतज्ञानसिद्ध्यर्थं तादृशज्ञानविज्ञानपदार्थनिकरनिरूपणार्थमादौ सूत्रकारः महर्षिगौतमः न्यायसूत्रं सूत्रितवान्। वैशेषिकसूत्रकारः महर्षिकणादोऽपिविभागमुखेन षड्भावपदार्थमभ्युपेत्य वैशेषिकदर्शनं संरचितवान्। सूत्रग्रन्थे तावत् भावभिन्नाभावपदार्थानामनिरूपणे यदि वैशेषिकदर्शनस्य न्यूनत्वमागच्छति तथाभूताशंका नैव करणीया, यतः प्रतियोगि निरूपणाधीनमेव अभावनिरूपणंभवतीत्यतः नास्ति काचन औलुक्यदर्शनस्य न्यूनता। उक्तं च श्रीमता उदयनाचार्येण –

**"अभावस्तु स्वरूपवानपि पृथक् नोद्दिष्टः**

**प्रतियोगिनिरूपणाधीननिरूपणत्वात्"**[1]।

एवञ्च सूत्रकारैः कणादैः -**"तथाभावे भावप्रत्यक्षत्वाच्च""एतेनाघटोऽगौरधर्मश्च व्याख्यातः"**[2] इत्यादि सूत्रै: प्रागभावादिपदार्थानां स्वरूपमभ्युपगतम्। अतः न्यायवैशेषिकनये द्रव्यादिभेदात् सप्तपदार्थः प्रसिद्धःन्यायसूत्रप्रतिपादितषोडशपदार्थानां वैशेषिकाभ्युपगतसप्तपदार्थेषु अन्तर्भूतत्वात् उभयसिद्धान्ते यदि सप्तपदार्थ: स्वीक्रियते तर्हि नास्ति काचन विप्रतिपत्तिः।एते च पदार्था वैशेषिकनये प्रसिद्धाः, नैयायिकानाम्प्यविरुद्धाः।सप्तपदार्थेषु नवैव द्रव्याणि पृथिव्यादिभेदाद्।**"क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः द्रव्याणि"**[3]। एषु नवद्रव्येषु आकाशादि पञ्चानां सर्वथा नित्यत्वम्। कार्यत्व नित्यत्वभेदात् पृथिव्यादिचतुर्णां द्वैविध्यमुपपादितं न्यायवैशेषिकदार्शनिकैः। कार्यभूतानां पृथिव्यादिचतुर्णामुत्पत्तिविनाशौ भवतः। नित्यभूतानां परमाणूनां

---

[1]**किरणावली पृ-27**

[2]**वै.सूत्रम् 9/1/3-8**

[3]**कारिकावली पृ-03**

नैवोत्पत्तिः न वा विनाशः। अतः न्यायवैशेषिकनये परमाणूनामतीन्द्रियत्वं जगदुत्पत्त्युपादानत्वं निरवयवत्वं नित्यत्वञ्च। परमाणोः किं लक्षणमितिजिज्ञासायामुच्यते शिवादित्येन- **"निरवयवः क्रियावान् परमाणुः"**[4]।पृथिवीजलतेजोवायुभ्यः परमाणुभ्य एवपार्थिव-तैजस-वायवीयपदार्थानामुत्पत्तिः।अर्थात् परमाणुद्वयसंयोगाद् द्व्यणुकस्य, द्व्यणुकत्रयसंयोगात् त्रसरेणोः, त्रसरेणुचतुष्टयसंयोगाच्चतरेणोः, अनेन क्रमेण महतीनां पृथिव्यादीनामुत्पत्तिर्भवति। दीधितिकारनये च त्र्यणुकानि एव मूलावयवाः, परमाणवो द्वयणुकानि च ते नाङ्गीकुर्वन्ति।**"परमाणुद्वयणुकयोश्च मानाभाव:, त्रुटावेव विश्रामात्"**[5]।परमाणुविषये दीधितिकारस्य वैमत्यदर्शनेऽपि समेषां न्यायवैशेषिकानां नये परमाणुषु एव विश्रामः। न तु द्व्यणुकादिषु। एषां परमाणूनां संयोगाद् बहुप्रपञ्चात्मकस्य जगतः सृष्टिः भवतीति न्यायवैशेषिकानामाशयः। एवञ्च परमाणुभ्यः जगतः सृष्टिर्भवतीति न्यायवैशेषिकयोः नयः आरम्भवादपदेन ख्यातः। तत्र कोऽसौ आरम्भवादः ? कश्च आरम्भः ? इत्यादिजिज्ञासायामस्माभिः निश्चप्रचं वक्तुं शक्यते यत् परमाण्वाद्युपादानभूतद्रव्ये उणुकादिनामुंत्पतिरेव आरम्भपदार्थः। आरम्भतत्त्वबुभुत्सया प्रवर्तिता कथा आरम्भवाद्पदार्थः। आरम्भवादसदभावे प्रमाणं प्रदर्शयति सूत्रकारः-**"व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात्"**[6]। अर्थाद् व्यक्तानां शरीरादीनां मूर्तपदार्थानां व्यक्तात् कारणीभूतात् मूर्तादेव भूतपदार्थादुत्पत्तिर्भवतीति प्रत्यक्षसिद्धत्वात्। व्यक्ताद् मृत्पदार्थाद् यथा व्यक्तस्य घटस्योत्पत्तिः दृश्यते तथा शरीरस्यापि शुक्रशोणितादिभ्य उत्पत्तिर्भवति। तत्र भणति भाष्यकारः वात्स्यायनः-**"व्यक्तञ्च खलु इन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तम्"**[7]। कारणद्रव्यस्य परमाणुलक्षणस्याप्रत्यक्षत्वेऽपि इन्द्रियग्राह्यं प्रत्यक्षं द्रव्यं कार्यभूतं व्यक्तमित्युच्यते। कार्यद्रव्यसादृश्यात् कार्यकारणयोः सजातीयस्यावश्यकत्वाच्च कारणमपि परमाणुद्रव्यं व्यक्तम्। तत्र च सारूप्यं कार्यकारणयोः

---

[4]**सप्तपदार्थी**

[5]**पदार्थतत्त्वनिरूपणम्**

[6]**न्या.सू. 4/1**

[7]**न्या.भा. पृ-350**

मृद्घटादिलक्षणयोः रूपादीनामन्वयदर्शनात् स्थूलपृथिव्यादिषु रूपादिकमस्तीति तत्कारणेनापि रूपादियुक्तेनैव भवितव्यमिति नित्यानामतीन्द्रियाणां पृथिव्यादीनां परमाणुरूपाणां स्थूलभूतकारणत्वमनुमीयते। रूपादियुक्तत्वादिति व्यक्ताद् व्यक्तं शरीरादिकमुत्पद्यते। तत्रेदमवधातव्यं यत् मूलसूत्रे "व्यक्ताद् व्यक्तानाम्"इत्यत्र "अव्यक्ताद् व्यक्तानामुत्पत्तिः"इति वक्तव्यमासीत्। एवञ्च"व्यक्ताद्" इति पदेन सांख्याभिमताव्यक्तायाः त्रिगुणात्मिकायाः प्रकृतेः नैव ग्रहणमित्याशयेन प्रकृतिपरिणामवादं परित्यज्य अक्षपादैः परमाणुवादोऽभ्युपगतः। जयन्तभट्टोऽपि गौतमीयं मतमभ्युपगत्य प्रवदति- **"व्यक्तादिति कपिलाभ्युपगतत्रिगुणात्मकाव्यक्तरूपकारणनिषेधेन परमाणूनां शरीरादौ कार्ये कारणत्वमाह"**[8]अर्थात् प्रत्यक्षमूलकानुमानप्रमाणेनादृष्टस्यातीन्द्रियस्य वा मूलभूतं यत्कारणं परमाणुः तस्य सद्भावत्वं सिद्ध्यतीति। उक्तं च भाष्यकारेण-दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः तस्य चादृष्टस्यानुमानमिति रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनां नित्यानामतीन्द्रियाणां कारणभावोऽनुमीयते इति"[9]। अभिप्रायस्तु रूपादिगुणविशिष्टमृत्तिकादिभ्यः तज्जातीयघटादिद्रव्याणामुत्पत्तिः दृश्यते, एतादृशदृष्टान्तेनैव अतीन्द्रियमूलकारणभूतानां परमाणूनां सद्भावत्वं प्रसिद्ध्यति, यतः"कारणगुणाः कार्यगुणमारभन्ते"इति न्यायेन मूलभूतकारणपरमाणौ ये ये गुणाः विद्यन्ते, ता दृशकारणेनोत्पद्यमाने सजातीये कार्यद्रव्येऽपि तादृशगुणानामुत्पत्तिर्भवतीत्यतः परमाणोः सद्भावत्वम्। आचार्येण शंकरेण**"इदानीं परमाणुकारणवादं निराकरोति"**[10]स्वकीये शारीरकभाष्ये यद् भाषितं तन्नानुमतं भाति। यतः तस्य शिष्यः सुरेश्वराचार्यः मानसोल्लासग्रन्थे भणति-

**"परमाणुगता एवं गुणा रूपरसादयः।**
**कार्ये समानजातीयमारभन्ते गुणान्तरम्"।।**[11]

---

[8]**न्यायमञ्जरी**

[9]**न्या.भा. पृ-350**

[10]**शा.भाष्यम्**

[11]**मानसोल्लास**

अस्याः कारिकायाः व्याख्यानावसरेऽस्मिन् तट्टीकाकारः रामतीर्थ: गदति-

“समानजातीयमिति विशेषगुणाभिप्रायम्....”। तेषामयमेवाशयः- परमाणुद्वयगतद्वित्वसंख्याजन्य द्व्यणुके यत्परिमाणं तस्य संख्यायाः वैजात्यगुणेऽपि उपर्युक्तनियमे न कश्चन व्यभिचारः। यतः संख्यापरिमाणयोः द्रव्यमात्रस्य सामान्यगुणत्वात् विशेषगुणाभावाच्च। यदि तत्र वैदान्तिकैः आशंक्येत विशेषगुणस्य किमपिलक्षणं नैयायिकै: वैशेषिकैश्च नाभिहितमित्यपि असंगतं भाति। विशेषगुणस्य सामान्यलक्षणं तत्तदाचार्यैः प्रतिपादितत्वात्। तद्यथा -

“विशेषगुणत्वं स्वाश्रयसमानाधिकरणयत्किञ्चिज्जातिव्यापकतावच्छेदिका या स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपाधिमदितरभेदव्याप्यतावच्छेदिका गुणत्वव्याप्या जातिस्तद्वत्त्वमेव बोध्यम्”। “पृथिवीवृत्तिवृत्ति-जलवृत्तिवृत्तीतरसंयोगाऽवृत्तिगुणत्वव्याप्यजातिमत्त्वम्विशेषगुणत्वम्”।कालदिङ्मनोवृत्तिताऽनवच्छेदकजाति मद्गुणत्वं विशेषगुणत्वमिति[12]।

तत्र परमाणोः सद्भावत्वे किमपि मानमस्ति न वेति जिज्ञासायां अनुमानप्रमाणं प्रदर्शयति जगदीशः- “परमाणु द्व्यणुकानुमानं यथा- त्रसरेणुः सावयवद्रव्यारब्धो बहिरिन्द्रियवेद्यद्रव्यत्वात्, वहिरिन्द्रियवेद्यद्रव्यं यत् यत् तत् सावयवद्रव्यारब्धं यथा घटः। अत्र त्रसरेणुः पक्षः सावयवद्रव्यारब्धत्वं साध्यं बहिरिन्द्रियवेद्यद्रव्यत्वादिति हेतुः, घटो दृष्टान्तः। अनेन द्व्यणुकं परमाणुश्च सिद्ध्यति”[13]।यद्यपित्रसरेण्वाद्यात्मकस्यापि वायोर्गगनादीनाञ्चातीन्द्रियत्वात् नात्रानुमानस्य प्रमाणलंप्रदर्शयितुं युक्तं न केवलमणुद्व्यणुकयोस्तथापि पृथिव्यादिचतुष्टयस्यैवाणुद्व्यणुकयोः सत्त्वात् प्रथमतः तयोरेवानुमानमभिहितम्। त्रसरेण्वाद्यन्त्यावयव्यन्तेषु द्रव्येषु प्रत्यक्षस्यैव प्रमाणत्वात् त्रसरेणोः

**[12]न्या.सि.मुक्ताबली**

**[13]तर्कामृतम् प-14**

पक्षरूपेणोल्लेखः। महत्त्वे सत्युद्भूतरूपवत्त्वात्त्रसरेणुः जालसूर्यमरीचिस्थो दृश्यते। साध्यघटकीभूतं सावयवत्वमवयवसमवेतत्वमवयवत्वञ्च द्रव्यसमवायिकारणमिति ज्ञेयम्।द्रव्यारब्धत्वञ्च द्रव्यनिष्ठऽर्थान्तरत्वापत्तिः, सावयवत्वमात्रस्य साध्यत्वे परमाणुसिद्धिर्नस्यादित्यतः उभयपदम्। सावयवारब्धत्वादस्याद्रव्ये बाधाद्द्रव्यपदम्। वस्तुतःसावयवत्वस्यद्रव्यारब्धत्वस्यवासावयवारब्धत्वस्य वा अभाववति परमाण्वादौ हेत्वधिकरणताया। असत्त्वाद्व्यभिचाराप्रसक्तेः तत्तन्मात्रस्य साध्यत्वे व्यर्थविशेषणत्वं दोष इति नाऽशङ्क्यं, यतः साध्यांशे व्यर्थविशेषणस्य अदोषत्वादिति। एवञ्च मूले हेतुपदे वहिरिन्द्रियवेद्यद्रव्यत्वम्, तच्च मनोभिन्नेन्द्रियग्राह्यद्रव्यत्वम्। आत्मनि अतिप्रसक्तिवारणाय वहिः पदम्। रूपादौ च व्यभिचारवारणाय द्रव्यपदम्। रूपादौ द्रव्यारब्धत्वस्य विद्यमानत्वे का क्षतिः ? इति जिज्ञासायामुच्यते रूपादेर्गुणत्वेन स्वसमवायिनिष्ठ-स्वसजातीयगुणारब्धत्वनियमात्। तथा च कणादसूत्रम्–

**“द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम्”, द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्”[14]।** उपर्युक्तहेतुना त्रसरेणुपक्षे सावयवद्रव्यारब्धत्वं सिद्ध्यति न तु परमाणोः। तथा च उच्यते परिशेषानुमानद्वारा साध्यघटकसावयवद्रव्यत्वेन द्व्यणुकस्य तदवयवत्वेन च परमाणोः सिद्धिर्भवति। परमाणोः सिद्धिविषये मुक्तावलीकारः भणति- “महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणु-परिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः”[15]। एवञ्च चार्वाका अप्रत्यक्षे परमाणं द्वयणुके च मानाभावात् त्रसरेणव एव अणुपरिमाणाश्रया जगत्कारणीभूताश्च मन्यन्ते दीधितिकारोऽपि त्रसरेणुपर्यन्तमेवावयवधाराविश्राममङ्गीकृत्यजगत्कारणतत्रसरेणावेव अभ्युपगच्छति। तन्मतनिराकरणाय विश्वनाथः प्रवदति–“त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात्, घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणो रवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः”[16]।

---

**[14]वै.सू. 1/1/9-10**

**[15]न्या.सि.मुक्तावली**

**[16]न्या.सि.मुक्ताबली पृ-119**

उपर्युक्तानुमानेन यदि सावयवत्वसिद्धिः तदा-द्व्यणुकावयवाः सावयव महदारम्भकारम्भकलात् कपालवदित्यनुमानेन परमाणोरपि सावयवत्वसिद्धि स्यादित्याशंक्य तं निराकरोति-**"अनवस्थाभयेन तदसिद्धेरिति"**[17]। अर्थअप्रामाणिककल्पनासमाप्त्यभावात्मिका अनवस्थाया आपत्तिभयेन अवयवधाराया अनुमित्यविषयत्वात् परमाणौ विश्रामः स्वीकार्यः। तथा सति परमाणूनां निरवयवत्वं सिद्ध्यति। परमाणोः सद्भावे इत्थमपि श्रूयते-

**"जालमध्यगते भानौ यत् सूक्ष्मं दृश्यते रजः।**

**तस्य षष्ठतमो भागः परमाणुः प्रकीर्तितः"॥**

त्रसरेणोः सद्भावे स्मृतिः वदति-

**"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।**

**प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते"॥**[18]

अर्थात् गवाक्षविवरप्रविष्टसूर्यरश्मिषु यत्सूक्ष्मं रजो दृश्यते तदृश्यमानः परिमाणानां प्रथमो त्रसरेणुः।"त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणुभिः" - वैद्यकपरिभाषादीपः।

**"जालसूर्यमरीचिस्थं स्त्रसरेणू रजःस्मृतम्"**[19]। जालकान्तरप्रविष्टादित्यरश्मिस्थितं यद्रजस्तत् त्रसरेणुरित्युक्तं योगीश्वरादिभिस्तत्त्वदर्शिभिः। याज्ञवल्क्यस्मृत्यन्तर्गताया अस्या कारिकायाः व्यख्यानावसरे अपरार्कः प्रवदति -

"गवाक्ष-प्रविष्टादित्यकिरणेषु यत् सूक्ष्मं वैशेषिकोक्तनीत्या द्वयणुकत्रयारब्धं दृश्यते रजः, तत् त्रसरेणुरिति मन्वादिभिः स्मृतम्"[20]।सूत्रकारेण परमाणुविषये संकेतितं यत्"परं वा त्रुटेः"[21], अर्थात् परं यः स

---

**[17]न्या.सि.मुक्ताबली पृ-118**

**[18]मनु 8/132**

**[19]याज्ञ. आचार-362**

**[20]यास. अपरार्कभाष्यम्**

परमाणुः, तस्य चातिसूक्ष्मत्वात् विभागो न सम्भवति। **“स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः”**[22]**“त्रुटिस्त्रसरेणुरित्यनर्थान्तरम्”**[23] इति वाचस्पतिमिश्राः प्रवदन्ति।

न्यायवैशेषिकयोः नये परमाणोः नित्यत्वम्। पृथिवीजलतेजोवायुनां ये सावयवभूताः ते अनित्याः भवन्ति। तदतिरिक्ताः निरवयवभूताः तेषां परमाणवः नित्या भवन्ति। उक्तं जगदीशेन-**“तत्र सावयवा अनित्या इतराणि नित्यानि”**[24]। परमाणूनां नित्यत्वात् परमाणोः परिमाणमपि नित्यं भवति । उक्तं च वैशेषिकसूत्रकारेण-**“नित्यं परिमाण्डल्यम् ”**[25]। परमाणुपरिमाणस्य नित्यत्वे सूत्रमेव प्रमाणम्। परिमण्डलमस्यास्तीति परिमाण्डल्यम् परमाणुपरिमाणः । तेन आश्रयनाशाभावात् परमाणुपरिमाणं नित्यमविनाशि। प्रत्यक्षसिद्धान्महतः परिमाणाद् विपरीतं तदणुपरिमाणम्।**“अतो विपरीतमणु”**[26]। तदर्थं परिष्करोति शंकरमिश्रः- **“अणुत्वं हि कार्यद्व्यणकमात्रवृत्तिः, नित्यं तु परमाणुवृत्ति”**[27]। एवञ्च परमाणुपरिमाणं न कस्यापि कारणं भवति।उक्तं कारिकावलीकारेण-**“पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्”**[28]। अर्थात् परितो मण्डलं वर्तुलः परिमण्डलं तस्य भावः पारिमाण्डल्यं परमाणुपरिमाणम्। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् महादारब्धस्य महत्तरत्ववदणुजन्य-स्याणुतरत्वप्रसङ्गाच्च परमाणुपरिमाणं न कस्यापि कारणम्। तथाचोक्तं

---

[21]**न्या.सू 4/2/17**
[22]**अमरकोशे**
[23]**तात्पर्यटीकायाम्**
[24]**तर्कामृतम् पृ-3**
[25]**वै.सू. 7/1/22**
[26]**वै.सू. 7/1/11**
[27]**वै.सू.उप. 7/1/11**
[28]**कारिकावली 15**

प्रशस्तपादाचार्येण-**“कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्यः”**[29]। एतेन सिद्धं यत् परमाणो-र्नित्यत्वमविनाशित्वं तत्परिमाणस्यापि नित्यत्वञ्च। तादृशपरमाणुपरिमाणस्य कारणत्वंनास्तीति न्यायवैशेषिकानां सिद्धान्तः।

तत्र सांख्याचार्याः कापिलाः परमाणोः श्रुतिप्रमाणाभावात् नित्यत्वं चाभ्युपगच्छन्ति। तथा च सूत्रम्-**“नाणुनित्यता तत्कार्यत्वश्रुतेः”**[30]। अर्थात् परमाणोः नित्यत्वविषये श्रुतेः अविद्यमानत्वात् तस्य जन्यत्वे च श्रुतेः विद्यमानत्वात् तस्य नित्यत्वं नास्ति। तत्र परमाणोः नित्यत्वं नाङ्गीकृतं तत्र तेषां समयः। नित्यत्वे यदि श्रुतिः नास्ति तर्हितस्य नित्यत्वं मास्तु, किन्तु जन्यत्वे श्रुतिवाक्यं वक्तव्यं तथा च सांख्याचार्यैः नोक्तमिति चेत् परमाणोः कथमनित्यत्वं सिद्ध्यति। भाष्यकारैरपि जन्यत्वविषये न केनापि श्रुतिवाक्यमुट्टङिकतम्। यदि उच्यते कालवशाद् श्रुतिवाक्यानां लोपः जातः-

**“कालार्कभक्षितं सांख्यशास्त्रं ज्ञानसुधाकरम्।**

**कलावशिष्टं भूयोऽपि पूरयिष्ये वचोऽमृतैः”॥**[31]

इत्यादि विज्ञानभिक्षुकथनं नानुमतं नानुभवसिद्धम्। एवञ्च उक्तसूत्रस्य व्याख्यानावसरे या स्मृतिः उट्टङ्किता-

**“अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः।**

**ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः”॥**[32]

एतादृश्या स्मृत्या यदि श्रुतिवाक्यमनुमेयं स्यात्तर्हि तादृशी श्रुतिः न केवला पराश्रुति अपि च सा अनुमितिपरश्रुतिः भवेत्। अनुमितिपरयाश्रुत्या परमाणोः जन्यत्व साध्ययितुं नैव शक्यते। यतः सूत्रकारैः

---

[29]**प्रशस्तपादभाष्यम्**

[30]**सां.सू. 5/87**

[31]**सां.प्र.भा.श्लो.सं-5**

[32]**म.स्मृति. 1/27**

अक्षपादाचार्यैः सांख्यसूत्रं विचार्य परमाणो निरवयवत्वं चाभ्युपगत्य तस्य नित्यत्वं साधितम्।"अण्व्यो मात्रा..." इत्यादि स्मृतिवाक्यात् सांख्यैः परमाणोः यज्जन्यत्वमवगतं तदपि न युक्तं भाति। यत"दशार्धानां"इत्यत्र दशार्धपदेन क्षित्यादिपंचभूतानां सूक्ष्मांशभूतानि यानि पञ्चतन्मात्राणि तेषां विनाशित्वमिति विवक्षिततत्वात्"मात्रा"पदेन च पञ्चतन्मात्रार्णा सूक्ष्मत्वं प्रतिपादयितुं"अण्व्यः"शब्दस्य प्रयुक्तत्वाच्च न परमाणोः जन्यत्वम्। एवञ्च गुणवाचकाणुशब्दात् स्त्रीप्रत्यये कृते"अण्वी"शब्दस्य निष्पत्तिर्भवति। तस्य शब्दस्य प्रथमायां बहुवचने"अण्व्यः"भवतीति स च शब्दः गुणवाचकः इति"मात्रा"शब्देन द्योत्यते, न तु परमाणुरूपेऽर्थे तस्य"अण्वी"शब्दस्य प्रयोगः मनुना कृतः, इति नैयायिकानामाशयः। एवञ्च काणादनये आकाशस्य नित्यत्वात् विभुत्वाच्च तन्मूलः न कोऽपि परमाणुरस्ति। सांख्यनये च आकाशस्य मूलतन्मात्रं शब्दतन्मात्रं विद्यते, अतः"मात्रा"पदेन आकाशस्य सूक्ष्मशब्दतन्मात्रं ग्रहणमिति। एतेन सुस्पष्टं भाति यत्"मात्रा"पदेन न परमाणोः ग्रहणं न वा सांख्याभिमतपञ्चतन्मात्रा परमाणु इति न्यायनये विवक्षितः।

तत्र परमाणुबोधकं किमपि श्रुतिप्रमाणमस्ति न वा इति जिज्ञासायामुच्यते-

**"विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतो पात्।**

**संबाहुभ्यां धमति संपतत्रैर्ध्यावाभूमी जनयन् देव एकः"॥**[33]

इत्यस्य मन्त्रस्य तृतीयपादे"पतत्र"शब्दस्य योहि प्रयोगः तस्यार्थः परमाणुः। परमाणूनां गतिशीलत्वात् गत्यर्थपद्धातुना निष्पन्नोऽयं पतत्रशब्दः परमाणुवाचकः इति वैदिकमन्त्राद् विज्ञायते। यतः मन्त्रस्य परार्धवाक्ये"पतत्रैः परमाणुभिः संजनयन् समुत्पादयन् संधमति संयोजयति"इत्याकारिकायाः व्याख्यायाः दर्शनात् परमाणुबोधकं श्रुतिप्रमाणमस्ति इति निश्चप्रचं वक्तुं शक्यते। अस्य मन्त्रस्य व्याख्यानावसरे उदयनः प्रवदति-**"पतन्तीति। संधमति- संजनयन्निति च व्यवहितोपसर्गसम्बन्धः।**

[33]**श्वेता.उप. 3/3**

**तेन संयोजयति समुत्पादयन्नित्यर्थः"[34]।** एवञ्च परमाणूनां जन्यत्वे श्रुत्यभावात् नित्यत्वे च विरुद्धश्रुतेः अभावात् अनुमानेन तस्य नित्यत्वं जगत्कारणत्वं च साधयितुं शक्यते।

यदि तेषां नित्यत्वमनुमानेन साध्यते तर्हि मध्यद्रव्ये द्रव्यान्तरस्य यदा संयोगः तदा सर्वावयवावच्छेदेन न तस्य संयोगः, यदि परमाणोः सावयवत्वं नाङ्गीक्रियते तर्हि तद्भिन्नपरमाणोः कथं संयोगः ? तत्र संयोगः स्वीक्रियते तर्हि तेषां परमाणूनां सावयवत्वमङ्गीकार्यम्। तेषां च सावयवत्वात् कथं नित्यत्वम्। यदि च निरवयवभूते परमाणौ परमाण्वन्तरस्य संयोगः स्वीक्रियते चेत्तर्हि तादृशसंयोगजन्यद्रव्यस्य कथं स्थूलत्वम् ? तदा च कथं न्यायवैशेषिकाभिमतः परर्माणुकारणवादः ? अतः शारीरकभाष्ये आचार्यैः शंकरैः न्यायाभिमतः परमाणुकारणवादः निराकृतः। परमाणोः निराकरणावसरे महायानबौद्धसम्प्रदायैरपिइत्थं भणितम्। तत्र विज्ञानवादिनः बौद्धाचार्या वसुबन्धवः इत्थं निगदन्ति-

**"न तदेकं न चानेकं विषयः परमाणुशः।**

**न च ते संहता यस्मात् परमाणुर्नसिद्ध्यति॥**

**षट्केन युगपद् योगात् परमाणोः षडंशता।**

**षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः"॥[35]**

तत्र वसुबन्धुना प्रथमकारिकाद्वारा वैभाषिकबौद्धसम्प्रदायाभिमतवाह्यविषयसत्तायाः खण्डनप्रकारो प्रदर्शितः। तद्यथा वैभाषिकाभिमतवाह्यविषयः न एकावयविविशिष्टः नानेकः, न वा पुञ्जीभूतः परमाणुसमूहः, यतः परमाणोरेवासिद्धत्वात्। कथमित्याकाङक्षायां द्वितीयकारिका द्वारा प्रोच्यते- परमाणुमनभ्युपेत्य तत्र परमाण्वन्तरस्य संयोगः इत्यभ्युपगमे न परमाणुसिद्धिः। यतः एकस्मिन परमाणौ उर्द्धम् अधः इत्यादि षड्दिग्भ्यः षढ्परमाणूनां युगपत्संयोगः तदा तस्य परमाणोः षडंशत्वमस्तीति वक्तुं

[34]**न्या.कुसु. 5/3**

[35]**विज्ञप्तिमात्रतासिद्धौ विंशतिकारिका**

शक्यते। तथान सम्भवति । यतः तस्मिन्नेव परमाणौ एकप्रदेशे तादृशषड्विधपरमाणूनां संयोगः न भवति। यस्मिन् प्रदेशे च एकस्य परमाणोः संयोगः तस्मिन् प्रदेशे पुनः परमाण्वन्तरस्य संयोगः नैव सम्भवति। अर्थात् तस्य परमाणोः भिन्नभिन्नप्रदेशेषु भिन्नभिन्नपरमाणूनां संयोगः स्वीकार्यः। तथा सति सावयवत्वात्असौ न परमाणुः।

वसुबन्धुमतमभ्युपेत्य पूर्वपक्षरूपेण सूत्रकाराः प्रवदन्ति-**"संयोगोपपत्तेश्च"[36]।** अर्थात् मध्ये सन्नणुः पूर्वापराभ्यामणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते। व्यवधानेनाऽनुमीयते- पूर्वभागेन पूर्वेणाणुना संयुज्यते, परभागेन परेणामुना संयुज्यते, यौ तौ पूर्वापरौ भानौ तावऽस्याऽवयवौ। एवं सर्वतः संयुज्यमानस्य सर्वतो भागा अवयवा इति। एतन्मतं नैव समीचीनम्, यतः"अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः। अर्थात् यदि परमाल्पस्य परमाणोरपि सावयवत्वं स्यात् तदा न कस्यापि निरवयवत्वं स्यात् इत्युत्तरोत्रं सावयवत्वप्रसक्त्या शावयनत्वानवत्य प्राप्नोति। एतादृशानवस्थायां च सुमेरुसर्षपयोः साम्यमापद्येत। उभयो रप्यवयवानामानन्त्यात् सावयवत्वसमाप्तेरस्वीकारात्, न च सुमेरूसर्षपयोः साम्यं कस्याप्यभीष्टमिति। तन्निवृत्यर्थं परमाणौ सावयवत्वस्य समाप्तिः स्वीकार्येति परमाणूनां निरवयवत्वं सिद्धम्।

एवञ्च अनवस्थायां परमाणूनामवयवत्वविभागे स्वीकृते प्रतिद्रव्यं, द्रव्यावयवानामाऽऽनन्त्यापत्त्याऽवयवावयविनोः परिमाणभेदस्य गुरुत्वभेदस्य च ग्रहणं न स्यात् तथा च समपरिमाणत्वं स्यात्, न च एतत् कस्याप्यभीष्टमिति सावयवतानवस्थानिवृत्त्यर्थं परमाणोर्निरवयवत्वमभ्युवेयम्। एतेन सिद्धं भवति यत्परमाणूनामविनाशित्वान्न सर्वशून्यवादः, न वा परमाणुनामनित्यत्वम्, न वा परमाणूनामकारणत्वम्। यतः असमवायिकारण नाशात् कार्यद्रव्यस्य नाशः इति नैयायिकैरभ्युपगतत्वात् परमाणूनां नित्यत्वम्

---

**[36]न्या.सू. 4/2/24**

एवञ्च वैशेषिकैः**"क्रियागुणव्यपदेशाभावात्"**[37]इत्यनेन सूत्रेण, नैयायिकैश्च**"बुद्धिसिद्धं तु तदसत्"**[38] इत्यनेन सूत्रेण आरम्भवादस्य मूलभूतः असत्कार्यवादः स्थापितः। इत्यलमतिपल्लवितेन।

## ।। गुरूदेवार्पणमस्तु ।।

## परिशीलितग्रन्थसूची –


- महर्षिगौतमः । ***न्यायसूत्रम्*** । सम्पा. गङ्गानाथझा । पुने : ओरियेन्टाल वुक एजेन्सी, १९६९
- महर्षिकणादः । ***वैशेषिकसूत्रम्*** । दारभाङ्गा : मिथिला शोध संस्थानम्, १९०८
- आचार्यः वात्सायनः । ***न्यायभाष्यम्*** । सम्पा. द्वारिकादासशास्त्री । सुधी प्रकाशन, १९८६
- विश्वनाथपञ्चाननः । ***न्यायसिद्धान्तमुक्तावली*** । सम्पा. हरिरामशुक्ला । वाराणसी : चौखम्वा संस्कृत सीरिज, १९७२
- अन्नंभट्टः । ***तर्कसंग्रहः*** । सम्पा. श्रीनारायणचन्द्रगोस्वामी । कलिकाता : संस्कृत वुक डिपो ।
- विश्वनाथपञ्चाननः । ***कारिकावली*** । व्याख्या प्रभा मञ्जुषा, दिनकरी, रामरुद्री । देहली : चौखम्वा संस्कृत प्रतिष्ठान ।
- उदयनार्यः । ***किरणावली*** । सम्पा. जे एस जेटली । वडौदा : ओरियेन्टाल रिसार्च इनस्टिटिउट, १९९१
- छान्दोग्योपनिषद । प्राच्य भारती प्रकाशन, १९८५
- उदयनार्यः । ***न्यायकुसुमाञ्जलिः*** । सम्पा. श्रीमोहन भट्टाचार्यः । कलिकाता : पश्चिमवङ्ग राज्य पुस्तक भाण्डार, २०१५


---

[37]**वै.सू. 9/1/1**

[38]**न्या.सू. 4/1/50**

- श्रीजयन्तभट्टः । ***न्यायमञ्जरी*** । सम्पा. श्रीपञ्चाननतर्कवागीशः । व्याख्या. अमितभट्टाचार्यः । कलिकाता : संस्कृत वुक डिपो, २०१६
- केशवमिश्रः । ***तर्कभाषा*** । सम्पा. डी आर भाण्डारकर । मुम्वाई : सागर प्रेस, १९६७
- शिवादित्यकृतः । ***सप्तपदार्थी*** । सम्पा. अमरेन्द्रमोहन तर्कतीर्थ । कलिकाता : मर्डार्न प्रिन्टिं हाउस, १९३४


✻ ✻✻✻✻